✧˖°*❋ ❋*°˖✧

# સૂર્યાષ્ટકમ્

## Suryashtakam
### in gujarati

✧˖°*❋ ❋*°˖✧

# || સૂર્યાષ્ટકમ્ ||

આદિદેવ નમસ્તુભ્યં પ્રસીદ મભાસ્કર
દિવાકર નમસ્તુભ્યં પ્રભાકર નમોસ્તુતે

સપ્તાશ્વ રધ મારૂઢં પ્રચંડં કશ્યપાત્મજં
શ્વેત પદ્મધરં દેવં તં સૂર્યં પ્રણમામ્યહં

લોહિતં રધમારૂઢં સર્વ લોક પિતામહં
મહા પાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહં

ત્રૈગુણ્યં ચ મહાશૂરં બ્રહ્મ વિષ્ણુ મહેશ્વરં
મહા પાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહં

બૃંહિતં તેજસાં પુંજં વાયુ માકાશ મેવ ચ
પ્રભું ચ સર્વલોકાનાં તં સૂર્યં પ્રણમામ્યહં

બંધૂક પુષ્પસંકાશં હાર કુંડલ ભૂષિતં
એક ચક્રધરં દેવં તં સૂર્યં પ્રણમામ્યહં

વિશ્વેશં વિશ્વ કર્તારં મહાતેજઃ પ્રદીપનં
મહા પાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહં

તં સૂર્યં જગતાં નાધં જ્નાન વિજ્નાન મોક્ષદં
મહા પાપ હરં દેવં તં સૂર્યં પ્રણમામ્યહં

સૂર્યાષ્ટકં પઠેન્નિત્યં ગ્રહપીડા પ્રણાશનં
અપુત્રો લભતે પુત્રં દરિદ્રો ધનવાન્ ભવેત્

આમિષં મધુપાનં ચ યઃ કરોતિ રવેર્દિને
સપ્ત જન્મ ભવેદ્રોગી જન્મ કર્મ દરિદ્રતા

સ્ત્રી તૈલ મધુ માંસાનિ હસ્ત્યજેત્તુ રવેર્દિને
ન વ્યાધિ શોક દારિદ્યં સૂર્યલોકં સ ગચ્છતિ

**ઇતિ શ્રી શિવપ્રોક્તં શ્રી સૂર્યાષ્ટકં સંપૂર્ણં |**

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net